SEAT NO. ______ No. of Printed Pages: 2

[139/A27]

# SARDAR PATEL UNIVERCITY

**B. A. Semester – V (CBCS) Examination.**

**Saturday, 27th October, 2018**

**02:00 P.M. TO 05:00 P.M.**

**SANSKRIT PAPER –XV**

**SUBJECT CODE : UA05CSLT15**

**Total Marks: 70**

दशकुमारचरितम् (उच्छ्वास – ६) दण्डि: ।

गीतगोविन्द: – जयदेव: ।

---

प्रश्न – १ (અ) નીચેનામાંથી ગમે તે બે ગદ્યખંડનો અનુવાદ કરો. (१०)

(१) अनिषिद्धदर्शना चेयमस्मिन् कन्दुकोत्सवे ।सफलमस्तु युष्मच्चक्षु: । आगच्छतं द्रष्टुम् । अहमस्या: सकाशवर्तिनी भवेयम् । इत्ययासीत् । तामन्वयाव चावाम् ।महति रत्नरङ्गपीठे स्थितां प्रथमं ताम्रोष्ठीम्पश्यम् ।अतिष्ठच्च सा सद्य एव मम हृदये । न मयाऽन्येन वाऽन्तराले द्रष्ट्य । चित्तीयाविष्ठचित्तश्चाचिन्तयम् – किमियं लक्ष्मी: ?

(२) सोऽहम् – 'अहो रमणीयोऽयं पर्वतनितम्बभाग:, कान्ततरेयं गन्धपाषाणवत्युपत्यका, शिशिरमिदमिन्दीवरारविन्दमकरन्दविन्दुचन्द्रकोत्तरं गोत्रवारि, रम्योऽयमनेकवर्णकुसुममञ्जरीभरस्तरुवनभाग: इत्यतृप्ततरया दृशा बहुबहु पश्यन्नलक्षिताध्यारूढक्षीतीधरशिखर: शोणीभूतमुत्प्रभाभि: पद्मरागसोपानशिलाभि: किमपि नालीकपरागधूसरं सरं समध्यगम्' ।

(३) अस्ति त्रिगर्तो नाम जनपद: । तत्रासन्गृहिणस्त्रय: स्फीतसारधना: सोदर्या धनक- धान्यक धन्यकाख्या: । तेषु जीवत्सु न ववर्ष वर्षाणि द्वादश दशशताक्ष:, क्षीणसारं सस्यम् औषध्या: वन्ध्या: न फलवन्तो वनस्पतय: । क्लीवा मेघा:, क्षीणस्त्रोतस: स्रवन्त्य:, पङ्कशेषाणि पल्वलानि, विरलीभूतं कन्दमूलफलम्, अवहीना: कथा:।

(४) अस्ति द्रविडेषु काञ्ची नाम नगरी ।तस्यामनेककोटिसार: श्रेष्ठिपुत्र: शक्तिकुमारो नामासीत्। सोऽअष्टादशवर्षदेशीयश्चिन्तामापेदे –'नास्त्यदाराणां अननुगुणदाराणां वा सुखं नाम। तत्कथं नु गुणवद्विन्देयं कलत्रम् ?' इति । अथ परप्रत्ययाहृतेषु दारेषु याद्रच्छिकीं गुणसंपत्तिमनभिसमीक्ष्य कार्तान्तिकोनाम भूत्वा वस्त्रान्तपिनद्धशालिप्रस्थो भुवं बभ्राम ।

(PTO)